# ईडे सुमनोवाणीम्

सुहृदां सुरसां सकलाभरणां सकलागमसञ्चारिणीं ।
आनन्दमयीं आह्लादकरीं ईडे सुमनोवाणीम् ।।

मन्दो यदीयकरुणावलोकनेनाशु भवति मानी ।
विज्ञानमयीं बहुमानकरीं ईडे सुमनोवाणीम् ।। १ ।।

सच्छास्त्रछात्रकुमुदप्रसादकरशुभ्रचन्द्रबिम्बां ।
सौन्दर्यमयीं सुश्लोककरीं ईडे सुमनोवाणीम् ।। २ ।।

श्रीरमणचरणचतुरार्चनप्रचुरवचननिगमरूपां ।
ऐश्वर्यमयीं आश्चर्यकरीं ईडे सुमनोवाणीम् ।। ३ ।।